# धर्मचौर्यरसायनम्

## *Dharmacauryarasāyana*

Critical text as published in:
*L'elisir del furto secondo il dharma*,
A. Passi ed., Milano, Ariele 2001.
(Apparatus in Italian at the end of each chapter)

Primary Sources:
— Adyar Library, MS 72486, XXVIII, A 10. See: *New Catalogus Catalogorum*, vol. 9, 244, & *Descriptive Catalogue of the Sanskrit Manuscripts in the Adyar Library*, Adyar; vol. V, *Kāvya, Nāṭaka, and Alaṅkāra*, by H.G. Narahari, 1951, 528.
— Narahari, N.G. (ed.): *Dharmacauryarasāyana of Gopālayogīndra. A Poetic Dissertation on the Ethics of Stealing*, «Adyar Library Bulletin», 1946, pp. I-X, 1-28.

आश्वासत्रितयोपेतं धर्मचौर्यरसायनम् ।
इदं तावत्प्रतिदिनं रसिकैः परिपीयताम् ॥ १ ॥
श्रीमद्गोपालयोगीन्द्रमुखराकेन्दुनिःसृतम् ।
तातकूलस्य वाग्जालमहाभाजनपूरितम् ॥ २ ॥
बुद्धिजाड्यहरं चापि विस्मयानन्ददायकम् ।
पिबध्वं पण्डिताः सर्वे धर्मचौर्यरसायनम् ॥ ३ ॥
धर्मसेतुरिति ख्याता काचित्पुर्यवसत्पुरा ।
यस्यामासीद्धर्मकेतू राजा धर्मपरायणः ॥ ४ ॥
तत्तद्वर्णाश्रमोपेततत्तज्जनसमाकुले ।
प्राकारपरिघाट्टालवीथीगोपुरमण्डिते ॥ ५ ॥
शुककोकिलभृङ्गादिध्वनिसंपूरितान्तरैः ।
उद्यानाम्रवणैश्छन्ने सर्वसंपत्समुन्नते ॥ ६ ॥
तत्रासीद्ब्राह्मणश्रेष्ठः कश्चिदाचारतत्परः ।
ब्रह्मज्ञो नीतिविख्यातो वेदवेदाङ्गपारगः ॥ ७ ॥
तपस्यतस्तस्य पुत्राश्चत्वार अभवन्पुरा ।
चत्वारो बाहव इव साक्षाच्छ्रीचक्रपाणिनः ॥ ८ ॥
तत्राद्यो धर्ममूलाख्यो द्वितीयो धर्मवर्त्मगः ।
तृतीयो धर्ममित्राख्यश्चतुर्थो धर्मसंग्रही ॥ ९ ॥
कृतोपनीतयोऽधीत्य वेदादीन्स्वपितुर्मुखात् ।
गार्हस्थ्याश्रममासाद्य चक्रुस्ते धर्ममुत्तमम् ॥ १० ॥
नित्यं प्रातःस्नानसंध्यागायत्रीजपपूर्वकम् ।
अग्निहोत्रादिकं कृत्वा न्यवसन्पितृपूजकाः ॥ ११ ॥
धार्मिकस्तत्पिता पुत्रपौत्राद्यखिलसंपदः ।
व्यवहारतया पश्यन्नपि गायत्र्यभिन्नया ॥ १२ ॥
जगज्जनन्यैव दत्तचित्तशुद्धिप्रसादतः ।
निरीषणोऽध्यात्मविद्यानिरतोऽभूत्सदा हृदि ॥ १३ ॥
एवं गते चिरं काले कदाचिदथ स द्विजः ।
ज्ञानदृष्ट्या स्वान्त्यकालद्योतकत्वेन भासुरम् ॥ १४ ॥
कैलासादागतं श्रीमद्विमानं सूर्यकोटिभम् ।
विलोक्य मुदितः पुत्रानाहूयेदं वचोऽब्रवीत् ॥ १५ ॥
हे पुत्रका गमिष्येऽहं श्रीमत्कैलासभूधरम् ।
न्यायार्जितं स्वल्पधनमस्तीदानीं मदन्तिके ॥ १६ ॥
ममौर्ध्वदेहिकं कर्तुमलमेतद्धनादिकम् ।
अनन्तरं काचमेकमपि नैवावशिष्यते ॥ १७ ॥
जीविष्यथ कथं वोध्वं यूयं दुर्वृत्तिवर्जिताः ।
सर्वात्मना मा कुरुध्वं मन्नाम्नस्त्वयशस्करम् ॥ १८ ॥
पुत्राणामनुरूपाणां जीविकावृत्तिकल्पने ।
अशक्तस्य पितुर्मेऽद्य धिग्धिग्जन्म निरर्थकम् ॥ १९ ॥
इति सांसारिकीं चिन्तां क्षणमेत्याश्रुमोचके ।
तस्मिन्द्विजेऽथ तत्पुत्रास्तमवोचन्पृथक्पृथक् ॥ २० ॥
तत्राद्यस्तनयः प्राह पितरं भयविह्वलः ।
साञ्जलिः प्रणतो भूत्वा सगद्गदमिदं वचः ॥ २१ ॥
किमर्थं तप्यसे तात सर्वं जानासि लौकिकम् ।
किमस्मच्चिन्तया तेऽद्य परलोकं यियासतः ॥ २२ ॥
कथं त्वया न दत्तं स्यादस्माकं शाश्वतं धनम् ।
यदस्मासु निधीयन्ते वेदशास्त्रादिसंपदः ॥ २३ ॥

यया तु संपदा जीवः स्वात्मानन्दमवाप्नुयात् ।
कथं तया समानत्वमीयुर्नश्वरसंपदः ॥ २४ ॥
विद्यासंपदमासाद्य दरिद्रोऽपि प्रमोदते ।
विद्यालेशांशरहितः संपन्नोऽपि विषीदति ॥ २५ ॥
विद्यानामपि सर्वासां गायत्री ब्रह्मरूपिणी ।
विद्या वरिष्ठा यद्यस्मात्सैवास्माकं हि कामधुक् ॥ २६ ॥
किं किं वा न प्रदद्यात्सा गायत्री परदेवता ।
स्वाराधकानां भक्तानां या ब्रह्मैव प्रयच्छति ॥ २७ ॥
त्वयाध्यापितपूर्वा या श्रौतविद्या मयि स्थिता ।
तयैव विद्यया तात करिष्ये साधु जीवनम् ॥ २८ ॥
इत्येवं शपथं कृत्वा ज्येष्ठे तूपरते सति ।
पितरं प्रणिपत्याशु तत्कनिष्ठोऽप्यभाषत ॥ २९ ॥
शब्दशास्त्रस्य हे तात पाठप्रवचनादिभिः ।
जीविष्येऽहं चिरं कालं बहुलं धनमर्जयन् ॥ ३० ॥
मीमांसाद्वितयस्यैव पाठप्रवचनार्जितैः ।
धनैर्जीविष्य इत्येवं तृतीयोऽप्यब्रवीद्वचः ॥ ३१ ॥
अनन्तरं चतुर्थस्तु धीरो वाचालकाग्रणीः ।
पितरं प्राह विनयात्कृताञ्जलिरिदं वचः ॥ ३२ ॥
न क्वापि तुच्छफलदवेदशास्त्रादिविद्यया ।
जीवेयं किंतु तास्कर्यविद्याकामदुहा गुरो ॥ ३३ ॥
इति तद्गिरमाकर्ण्य कर्णनाराचिकायिताम् ।
ब्रह्मज्ञानी सुदुःखार्तस्तमुद्वीक्ष्याब्रवीद्वचः ॥ ३४ ॥
हा कष्टमभवद्बुद्धिस्तवेत्थंरूपिणी कथम् ।
शिशो त्वय्येव काणादविद्यायां स्थितिमीयुषि ॥ ३५ ॥
विश्वसेत्कृष्णसर्पं वा व्याघ्रं वापि च योषितम् ।
न विश्वसेच्चौर्यविद्यां प्राणमानापहारिणीम् ॥ ३६ ॥
कुपुत्रवत्त्वदोषेण मदीयतपसार्जिताः ।
मत्पुण्यलोका निखिला नाशमेष्यन्त्यसंशयः ॥ ३७ ॥
इत्युक्त्वा शोकसंतप्तहृदयं साश्रुलोचनम् ।
पितरं प्रेक्ष्य स प्राह धर्मसंग्रहिसंज्ञकः ॥ ३८ ॥
तात मा वह शोकं त्वं क्वापि मद्विषये यतः ।
तास्कर्यविद्यानैपुण्यसर्वस्वं मद्धृदि स्थितम् ॥ ३९ ॥
नैव निन्द्या क्वापि सा हि चौर्यविद्या महीयसी ।
चतुःषष्टिकलासंख्या यया संपूर्तिमागता ॥ ४० ॥
तथापि तस्या निन्द्यत्वमतद्धर्मविदां धिया ।
भाति कौशिकदृष्ट्यार्कप्रभाया निन्द्यता यथा ॥ ४१ ॥
चौर्यस्थलास्थलज्ञानं देशकालविनिर्णयः ।
अदृश्याञ्जनसिद्ध्याद्या धर्मास्तास्करिका मताः ॥ ४२ ॥
चौर्येऽपि वर्तते धर्माधर्मचिन्ता गरीयसी ।
यया विहीनस्तास्कर्याद्बध्यवध्यत्वमाप्नुयात् ॥ ४३ ॥
चौर्यवेषं मोहमूर्च्छाचूर्णसंग्रहणादिकम् ।
अलब्ध्वा चौर्यकृद्भूयाद्बध्यो वध्यश्च राजभिः ॥ ४४ ॥
अमूल्यवस्तुहृच्चौर्यधर्ममार्गाविरोधतः ।
यः कुत्राप्यगृहीतश्च स चोरो भूपतेः समः ॥ ४५ ॥
व्यवहारे चौर्यकर्म कृत्वा तच्छादनाक्षमः ।
परमार्थे ज्ञानचौर्यं कृत्वा तच्छादकः कथम् ॥ ४६ ॥

सामर्थ्यमस्ति मम मोहनचूर्णमन्त्र-
तन्त्रादिभिर्निखिलमानुषचित्तवृत्तिम् ।
संमोह्य तस्करितुमार्य गुरो तदर्थं
दातुं त्वमर्हसि जवादधुनाभ्यनुज्ञाम् ॥ ४७ ॥

इत्याकर्ण्य वचस्तस्य धर्मसंग्रहिणः पिता ।
क्षणमालोच्य निश्चित्य दैवतन्त्रं वचोऽब्रवीत् ॥ ४८ ॥
विधिर्बलीयसी पुत्र प्राणिनां दुस्त्यजा हि सा ।
यथेष्टवृत्त्या जीवस्व मानृतं वद किंचन ॥ ४९ ॥
धर्मचौर्येण ते सत्यवचनेन च मङ्गलम् ।
भूयादेव न संदेहः कीर्त्यायुर्वंशवृद्धिदम् ॥ ५० ॥
इत्युक्त्वा सहसा योगी दृढयोगसमाधिना ।
भित्त्वा स्वकीयमूर्धानं निश्चक्राम बहिर्जवात् ॥ ५१ ॥

साक्षाच्छङ्कररूपिभिः शिवगणैरानीतमन्यादृशं
भास्वत्कोटिसमं विमानमधिरुह्यातुल्यदिव्याकृतिः ।
वीणावेणुमृदङ्गवाद्यनिनदैर्भिन्दन्नभोमण्डलं
श्रीकैलासमवाप सोऽयममरीगाढस्तनालिङ्गितः ॥ ५२ ॥

पातिव्रत्यप्रभावेण तत्पत्न्यनुमृतिं गता ।
कमनीयाकृतिर्भूत्वा कमित्रन्तिकमाप सा ॥ ५३ ॥
ततस्ते तनयाः सर्वे तयोः पित्रोर्यथाक्रमम् ।
कृत्वौर्ध्वदेहिकं कर्म स्वां स्वां वृत्तिं समाश्रयन् ॥ ५४ ॥

इति श्रीधर्मचौर्यरसायनग्रन्थे प्रथमाश्वासः ।

*Apparato critico a I.*

**In marg**. *fol.* 1A. sx. हरिः ॐ. **1*a***: G. °तृतयो°. **2*a***: G. श्री । —— [tratto orizz.] श्रीमत्गो°; **2*c***: v. anche p. 37, nota 51; **2*d***: alla fine del verso la numerazione ripete il numero 1 e quindi prosegue diminuita di uno, fino al 53 (= N. 54); nel testo si è mantenuta la numerazione effettiva. **4*b***: N. पुर्यभवत्पुरा (v. anche *ibid.* nota 1). **5*d***: G. वीधी°(per वीथी°; cfr. anche 2.14, 2.57, 3.128). **6*c***: G. उद्यानाम्म्रवनैच्छन्ने. **7*c***: G. बृह्मज्ञानीति°. **8*b***: sia G. sia N. hanno चत्वार अभवन्. **9*c***: G. त्रितीयो. **10*c***: G., N. गार्हस्था°. **11*a***: G. प्रातस्नान°; **11*d***: G., *A.* 240 पितृ°; N. प्रितृ. **14*d***: G. भास्वु° corretto in भासु°. **15*b***: G. विमानंकोटि°; सूर्य्य inserito sopra. **16*cd***: G. धनम्मस्ती°. **18*c***: N. मा कुरुत. **22*d***: *ex conj.* N.; G. परलोकमियासतः. **23*a***: G. दत्तन्स्स्याद्°; **23*b***: G. शाश्वतं(!)धनं. **24*ab***: G. जीवस्वा°; **24*c***: G. forse कथंत्तया; il gruppo è poco leggibile e mostra segni di correzione. **29*b***: G., *A.* 239 ज्येष्ठे; N. ज्येष्ठः. **30*d***: *ex conj.* *A.* 240; G., N. धनमार्जयन्. **31*c***: G. lacunoso [ध]नै°; **31*d***: G. त्रितीय्योप्य°, con प्य corretto da प्र. **34*c***: G. सुदुखार्त°. **37*a***: *ex conj.*; G. कुपुवत्वदोषे [fol. 4A]णमदीय्यतपसार्जिताः । (manca una sillaba) मत्पुण्यलोकानिखिलानाशामेष्यन्त्य [corretto da °न्ति] संशयः ॥; N. ha: कुपुत्र तव दोषेण मदीयतपसार्जिताः । पुण्यलोकास्तु निखिला, ecc. **38*d***: N. धर्मसंग्रह°. **40*d***: G. संपूर्त्तिम्मा°. **41*a***: G., *A.* 239 तस्या; N. तस्य; **41*b***: N. °विदं corretto in °विदां negli *errata*; **41*d***: N. प्रभया, corretto in प्रभाया negli *errata*. **43*d***: *ex conj.*; G. बद्धवद्ध्यत्वमाप्नुयात्; N. बद्धवध्यत्वम°. **44*a***: G. °मूर्छा°; **44*c***: G., N. अलब्धा, corretto da N. negli *errata* in अलब्ध्वा; vedi anche *A.* 240. **47*a***: *ex conj.* Aklujkar; G., N. °चूर्णमत्र. **49*c***: °वृत्त्या *ex conj.* Aklujkar; G., N. °वृत्या. **51*c***: भित्त्वा *ex conj.* Aklujkar; G., N. भित्वा. **53*a***: *ex conj.*; G., N. प्रभावेन. **Col.**: G. °ग्रन्धे per °ग्रन्थे; non riportato in N.

## द्वितीयाश्वासः

अथाविभक्ताश्चत्वारो भ्रातरोऽन्योन्यसौहृदाः ।
सुतरामभवंश्चैकगृहकृत्यास्ततः परम् ॥ १ ॥
शुभे दिवसनक्षत्रे ततश्चौर्यचिकीर्षया ।
निशि स्वभार्यामुत्थाप्य चतुर्थस्तनयोऽब्रवीत् ॥ २ ॥
अयि कल्याणि सुभगे भाग्यकालस्तवागतः ।
यदस्मदीयचौर्येण भूयास्त्वं भाग्यशालिनी ॥ ३ ॥
एकाकिन्येव तिष्ठात्र बुद्धिजाड्यसमुद्भवम् ।
क्लेशं दूरीकुरु क्षिप्रं प्रहर्षं हृदि धारय ॥ ४ ॥
प्रयाणकाले रुदतीं भार्यां वीक्ष्य प्रयाति यः ।
पुनर्नावर्तते सोऽसौ तस्मात्त्वं मुदिता भव ॥ ५ ॥
पत्युर्निशम्य वचनं शोकमन्तर्निगृह्य सा ।
साध्वी भर्तारमालोक्य प्राह प्रहसितानना ॥ ६ ॥
शीघ्रं त्वं गच्छ मन्नाथ मदीया कुलदेवता ।
काली करालवदना सहायं ते करिष्यति ॥ ७ ॥
तथापि स्नेहभावेन यद्ब्रवीमि शृणुष्व तत् ।
पतिव्रतानां नारीणां पतिरेव गतिर्यतः ॥ ८ ॥
मानृतं वद हे पुत्रेत्येवंरूपं पितुर्वचः ।
पालयस्व ततोऽवश्यं तव श्रेयो भविष्यति ॥ ९ ॥
इति पत्न्या वचः श्रुत्वा स्नेहयुक्तं सयुक्तिकम् ।
प्रतिनन्द्याब्रवीद्धृष्टस्तथास्त्विति शुभानने ॥ १० ॥
चौर्यवेषादिकं धृत्वा काङ्कालैरङ्गुलीयकैः ।
कराङ्गुलीरलंकृत्य नीलवस्त्रावृताङ्गवान् ॥ ११ ॥
अदृश्याञ्जनसंजाततिलकश्रीललाटवान् ।
मोहचूर्णाढ्यनीवीभिः कटिशोभां विधाय च ॥ १२ ॥
चौर्ययष्टिकरश्चार्धरात्रे तूर्णं विनिर्गतः ।
गाढान्धकारसमये निःशब्देऽतिभयंकरे ॥ १३ ॥
महायोगीव धीरः सन्नानावीथिषु संचरन् ।
कुत्र गन्तव्यमित्यन्तर्विचार्यैकत्र तस्थिवान् ॥ १४ ॥
एतस्मिन्नेव समये तत्पुरीनायको नृपः ।
धर्मकेतुर्महाधीरो महाविद्वान्महामतिः ॥ १५ ॥
राजयोगी नागरिकशोधनं कर्तुमिच्छया ।
राजचिह्नादिकं त्यक्त्वा वेषान्तरनिगूहितः ॥ १६ ॥
अदृश्यप्राणिदृश्यत्वकरदिव्याञ्जनेक्षणः ।
एकाकी विचरन् राज्यां वेत्रपाणिः सुनिर्भयः ॥ १७ ॥
निःशब्दे निर्जने गाढतमसा परिवेष्टिते ।
तिष्ठन्तं स्वपुरोभागे धर्मसंग्रहिसंज्ञकम् ॥ १८ ॥
द्विजं वेषान्तरच्छन्नं विलोक्याश्चर्यसंयुतः ।
को भवानिति धैर्येण पप्रच्छ धृतिमान् यतः ॥ १९ ॥
स विप्रस्तद्वचः श्रुत्वा तं च वेषान्तरावृतम् ।
नृपमालोक्य चोरोऽयं मादृशः कश्चनेति च ॥ २० ॥
सम्यङ् निश्चित्य तदनु सत्यवाग्ब्राह्मणोऽस्म्यहम् ।
चौर्यार्थमागतो नूनमित्युक्त्वा निर्भयः स्थितः ॥ २१ ॥
तदीयसत्यवाक्येन तोषितो विस्मितो नृपः ।
तत्समीपमुपागम्य पुनः पप्रच्छ साञ्जलिः ॥ २२ ॥
ब्रह्मन्नस्तु नमस्तुभ्यमहं क्षत्रकुलोद्भवः ।
दारिद्र्यहेतोश्चौर्येण जीवनं करवाणि भोः ॥ २३ ॥

ज्ञातित्वान्मयि विश्वासः क्वापि वा नैव जायते ।
एतद्देशाधिराजस्य धर्मकेत्वभिधानिनः ॥ २४ ॥
हीनवृत्तिरपि श्लाघ्या ज्ञातीनामाश्रयादपि ।
तथाप्यन्तर्मनस्ताप एव मे चौर्यजीवनात् ॥ २५ ॥
एवंस्थितेऽग्रजन्मा त्वं कथं चौर्यप्रहर्षवान् ।
न पापं विद्यते वा ते चौर्यवृत्त्यैव जीवतः ॥ २६ ॥
इति तस्य वचः श्रुत्वा सावमानं स भूसुरः ।
प्रहस्य किंचित्प्रोवाच वाक्यं वाक्यविदां वरः ॥ २७ ॥
क्षत्रवर्य न जानासि धर्माधर्मविनिर्णयम् ।
चौर्यात्परतरो धर्मो न कश्चिदपि विद्यते ॥ २८ ॥
चौर्यं न स्याद्यदि तदा धनाधिक्यवतां नृणाम् ।
धनान्धकारजो गर्वो धिक्कुर्यादीश्वरानपि ॥ २९ ॥
धनान्धकारगर्वेण दुर्वृत्तजनता भुवि ।
किं किं वा न चरेत्पापं न यत्र पितृपुत्रता ॥ ३० ॥
चौर्यप्राबल्यमेवं स्याद्यदि सर्वत्र भूतले ।
तदा न कस्यापि सौख्यलेशांशोऽप्युपजायते ॥ ३१ ॥
पापार्जितधनं त्यक्त्वा तथा परिमितं धनम् ।
असंख्येयधने चौर्यमहंतादोषनाशकम् ॥ ३२ ॥
ज्येष्ठपुत्रावमानेन त्रयः कुप्यन्ति सोदराः ।
इत्युक्तवचनस्याभिप्रायगोचरता भवेत् ॥ ३३ ॥
अग्निबाधे राजदण्डे धर्मचौर्ये च बाहुज ।
धनान्धकारगर्विष्ठदुर्नराणां गृहादिषु ॥ ३४ ॥
अग्निचोरमहीपालैः सर्वस्वहरणे सति ।
निर्धनत्वाद्वीतगर्वो नरः पूतो भविष्यति ॥ ३५ ॥
धनाधिक्येऽपि सद्विद्वान्न गर्वं याति कर्हिचित् ।
तद्धनेष्वणुमात्रं वा यो हरेत्स पतेदधः ॥ ३६ ॥
तस्मात्ते धर्मचौर्येऽस्मिन्दोषशङ्कावकाशता ।
न विद्यते सत्पुरुषैः सेव्यतामेतदन्वहम् ॥ ३७ ॥
चौर्यं किं नाम लोकेऽस्मिन्निति चेद्यत्र बध्यते ।
वध्यते च जनस्तद्धि चौर्यं निन्दनकारणम् ॥ ३८ ॥
वधबन्धादिरहितं यच्चौर्यं धर्ममार्गगम् ।
न तस्य चौर्यदोषोऽस्ति किं त्वदोषः प्रभुत्ववत् ॥ ३९ ॥
अथ वा यत्र कुत्रापि दृष्टं चेद्धर्मचोरणम् ।
फलाधिक्यप्राप्तिहेतोर्धनस्वामी न कुप्यति ॥ ४० ॥
किं त्वागत्य प्रतिदिनमीदृशं चोरणं कुरु ।
इति संतोषवचसा संमान्याशु प्रसीदति ॥ ४१ ॥
चौर्यं प्रकारभेदेन बहुधा विद्यते भुवि ।
तदेकदेशः संप्रोक्तः कृत्स्नशः केन वर्ण्यते ॥ ४२ ॥
इन्द्रस्तु गौतमसतीं चोरयित्वाप संकटम् ।
गोपस्त्रीचोरणं कृत्वा कृष्णो नैवाप संकटम् ॥ ४३ ॥
रामभार्यां चोरयित्वा पौलस्त्यः प्राणमत्यजत् ।
गुरुस्त्रीचौर्यकृच्चन्द्रो बभूव शिवभूषणम् ॥ ४४ ॥
तमश्चोरोंऽशुमाँल्लोके पापचोरो हरिः स्मृतः ।
अज्ञानचोरो हि गुरुर्ब्रह्मचोरास्तु योगिनः ॥ ४५ ॥
एवं विचार्यमाणे तु सर्वे चोराः प्रकीर्तिताः ।
चौर्यस्य विषयस्तावत्पृथक्पृथगवस्थितः ॥ ४६ ॥
कर्मचोरा ज्ञानचोरा भक्तिचोरादयोऽपि च ।
कदापि न्यायचोरस्य कलां नार्हन्ति षोडशीम् ॥ ४७ ॥
न्यायचोरेषु दुष्टेषु राज्यभारादिपूर्वकम् ।

प्रभुत्वं स्याद्यदि पृथक्प्रलयेन फलं किमु ॥ ४८ ॥
न्यायचोरमहीपालाः प्राणिनां प्राणहारिणः ।
प्राणा वै वसव इति श्रुतिवाक्यप्रमाणतः ॥ ४९ ॥
धर्ममार्गाविरोधेन यच्चौर्यं शास्त्रसंमतम् ।
तदेव धर्मचौर्यं स्याद्धर्महिंसादिवत्कृतम् ॥ ५० ॥
धर्मचौर्ये पापलेशप्रसक्तेरप्यभावतः ।
वृत्तिरेषा सुसंसेव्या भूसुरैरितरैश्च वा ॥ ५१ ॥
एतस्मिन्विषये दोषशङ्कामपि च मा कुरु ।
मत्तो यत्प्रार्थनीयं ते तत्सर्वं साध्यते मया ॥ ५२ ॥
इति तद्गिरमाकर्ण्य भूपो विस्मयसंयुतः ।
तत्सामर्थ्यमशेषेण द्रष्टुमौत्सुक्यवत्तया ॥ ५३ ॥
स्वरूपमप्रकाश्यैव शिष्यभावमुपेत्य च ।
इदं प्रोवाच वचनं कृताञ्जलिरवस्थितः ॥ ५४ ॥
भो भो विप्र महाभाग प्रभावस्ते महत्तरः ।
एतादृशी धर्मनीतिः क्वापि वा न श्रुता मया ॥ ५५ ॥
मदीयः संशयः सर्वो विनष्टो यत्ततोऽद्य माम् ।
शिष्यबुद्ध्यानुगृह्णीष्व भृत्यबुद्ध्यानुपालय ॥ ५६ ॥
इत्युक्त्वोपरते राज्ञि तमादाय करेण सः ।
बभ्राम सर्ववीथीषु चोरणार्थं यदृच्छया ॥ ५७ ॥
अथ तत्तद्गृहस्थस्य नामोक्त्वा वृत्तिपूर्वकम् ।
सम्यक्प्रदर्शितं तेन पुरं राज्ञा द्विजातये ॥ ५८ ॥
यद्यद्गृहं चोरणार्थं धनिनामवनीभुजा ।
पुरो निर्दिश्यते तत्तत्तेन विप्रेण दूषितम् ॥ ५९ ॥
अश्रोत्रियधनं त्याज्यं श्रोत्रियस्य धनं तथा ।
सखे वार्धुषिकस्यापि धनं त्याज्यमसंशयः ॥ ६० ॥
स्त्रीशूद्रवैश्यविप्राणां धनं त्याज्यं हि चोरणे ।
यद्भगोपार्जितधनमामश्राद्धधनं तु यत् ॥ ६१ ॥
देवदास्या धनं त्याज्यं तथा देवलकस्य च ।
ऋणग्रस्तदरिद्रस्य यद्धनं त्याज्यमेव तत् ॥ ६२ ॥
तिलस्य वा तण्डुलस्य लवणस्य च वाससाम् ।
विक्रेतॄणां यद्धनं स्यात्तत्सर्वं त्याज्यमेव हि ॥ ६३ ॥
कोटीश्वरो दरिद्रो हि लक्षेशोऽत्यन्तनिर्धनः ।
अयुतेशो महारिक्तः सहस्रेशो हि भिक्षुकः ॥ ६४ ॥
यतः कोटीश्वरादीनां प्रागुक्तधनशालिनाम् ।
अण्वायव्यययोः स्यातां संतोषव्यसने क्रमात् ॥ ६५ ॥
पृथुकघ्न्या वितन्तोश्च तथा कोटीश्वरस्य च ।
धनागमापायसुखदुःखयोः का भिदा भवेत् ॥ ६६ ॥
तस्माद्दुर्वृत्तिदुर्न्यायदुष्प्रसङ्गदुराग्रहैः ।
कृच्छ्रात्संपादितं कोटिसंख्याया अप्यधोगतम् ॥ ६७ ॥
इत्यादिकं धनं मोहाद्यस्तस्करितुमिच्छति ।
आकल्पं कोटिनरकानवाप्नोति न संशयः ॥ ६८ ॥
त्यजन्परिमितद्रव्ये चौर्यापेक्षां नरोत्तमः ।
कुर्वन्नसंख्यातधने तास्कर्यं शिवमृच्छति ॥ ६९ ॥
राजसद्मन्येव तावदसंख्यातधनस्थितिः ।
न्यायार्जितत्वं न स्याच्चेत्तदपि त्याज्यमेव हि ॥ ७० ॥
अस्मद्देशाधिपो राजा सुतरां धार्मिकोत्तमः ।
तस्मात्तत्रैव गन्तव्यमावाभ्यामधुना द्रुतम् ॥ ७१ ॥
इत्यन्योन्यं भाषमाणौ तौ विप्रक्षत्रपुंगवौ ।
आराद्ददृशतू राजभवनं श्रीमदाततम् ॥ ७२ ॥

धर्मसंग्रहिसंज्ञोऽथ ब्राह्मणः पार्श्ववर्तिनम् ।
महाराजं समुद्वीक्ष्य वचनं चेदमब्रवीत् ॥ ७३ ॥
अहो राजगृहं भाति कैलासमिव पाण्डरम् ।
चित्रध्वजपताकाद्यैरलंकृतमिदं महत् ॥ ७४ ॥
खरवल्गितखड्गाग्रैर्धनुष्पाणिभिरेव च ।
उत्तुङ्गतुरगारूढैर्यष्टिकुन्तगदाधरैः ॥ ७५ ॥
दीर्घश्मश्रुभिरव्यग्रैर्व्याघ्रैरिव दुरासदैः ।
शूरैर्भटवरैर्गुप्तं सिंहैरिव महद्वनम् ॥ ७६ ॥
अप्रवेश्यतमं मन्ये वायुनापीममालयम् ।
तस्माद्वद त्वं हे विद्वन्प्रवेशोपायमद्य मे ॥ ७७ ॥
इति तद्वाक्यमाकर्ण्य स महाराजशेखरः ।
तत्सामर्थ्यपरीक्षार्थमिदं वचनमब्रवीत् ॥ ७८ ॥
ब्रह्मन्यदृच्छया सुप्ते परिवारेऽथ कुड्यके ।
कृच्छ्राद् द्वारं विधायैव गन्तव्यमिति भाति मे ॥ ७९ ॥
इत्युदीरितमाकर्ण्य राज्ञा भूसुरसत्तमः ।
शिरःकम्पं विधायैव प्रहसन्वाक्यमब्रवीत् ॥ ८० ॥
कदा वा परिवारस्य सुप्तिः संततजाग्रतः ।
कदा वा घटते कुड्ये द्वारं कृत्वा प्रवेशनम् ॥ ८१ ॥
तव युक्तिस्तु सिद्धार्थैः पूर्वगैव न संशयः ।
द्वारप्रवेशादि यत्तत्सर्वं त्वय्येव तिष्ठतु ॥ ८२ ॥

इति श्रीधर्मचौर्यरसायनग्रन्थे द्वितीयाश्वासः ।

*Apparato critico a II.*

**1*a***: G. चत्वरो. **2*a***: G. दिवसनेक्षत्रे. **3*d***: N. भूयस्त्वं. **4*a***: G. एकाकिन्य्येव. **5*c***: G. पुनर्वर्त्ततेसो[corretto da सौ] सौ. **8*b***: G. श्रुणुष्व. **9*a***: N. पुत्रे°. **14*b***: G. नानावीधिषु; N. °वीथीषु. **16*a***: metrica difettosa. **17*bc***: *ex conj.*; G. विचरनृात्रां; N. विचरन् रात्रौ. **19*d***: G. पपृच्छ. **21*d***: G. निर्भयस्थितः. **23*b***: N. क्षत्त्र°. **24*d***: N. धर्मकेत्वभिधायिनः. **25*a***: *ex conj.* N.; G. हीन[corretto da हीनि]वृत्तिरपिश्याघ्य[corretto da °घ्य]. **25*d***: N. एवं. **26*d***: G. °वृत्यै°. **27*d***: N. °विदांवरः. **28*a***: N. क्षत्त्र°. **31*a***: *ex conj.* Aklujkar; G., N. प्राबल्यमेव. **31*c***: G. न parzialmente lacunosa; difetto di cesura dopo *c*4. **31*d***: N. उजायते. **32*d***: N. °हन्ता°; G. indefinibile. **34*ab***: N. inverte: धर्मचौर्ये राजदण्डे. **45*a***: G. °चोरोंशुमान्लोके; **45*b***: G. हरिस्मृतः. **49*c***: metrica difettosa. **50*d***: G. कृतं । । (*daṇḍa* ripetuto prima del foro); N. कृतौ ।. **54*a***: G. diversa tipologia di रू, senza altri confronti nel testo. **56*c***: G. °गृण्हीष्व. **57*c***: G. वीधीषु. **59*a***: G. यद्यत्गृहश्वेरणार्थं corretto da यत्यत्गृ°. **63*c***: G. विक्रेतृणां. **64*a***: G. in कोटीश्वरो lacuna nella parte consonantica di °रो°; **64*b***: G. लेक्षेषो. **65*a***: G. in कोटीश्वरादीनां lacuna per la parte vocalica di °रा°; lacuna parziale per °दीनां. **67*c***: N. कृच्छात्सं°. **68*b***: G. तत् [foro] करितुमिच्छति; N. तस्करितुमिच्छति. **70*a***: G. राजसद्मन्य्येव. **72*b***: G. °क्षतृ°; N. °क्षत्त्र°. **72*d***: N. श्रीमदा ततम्; cfr. *A.* 240. **73*b***: G. पार्श्ववत्तिनं (per पार्श्ववर्त्तिनं). **75*a***: N. °खड्गाग्रैर्ध°. **76*c***: G. सिह्मै° per सिंहै°. **Col.**: G. °ग्रन्धे per °ग्रन्थे; non riportato in N.

अथ तस्करविद्याया मार्गदर्शी महामतिः ।
धर्मसंग्रहिसंज्ञस्तं राजानं वाक्यमब्रवीत् ॥ १ ॥
इदमानीय चूर्णं त्वं वायुमार्गे प्रदर्शय ।
इत्युक्त्वा तत्करे मोहचूर्णमुष्टिमदाद्द्विजः ॥ २ ॥
तस्मिन् चूर्णे वायुमार्गे दर्शिते पृथिवीभुजा ।
सर्वेऽपि द्वारपालाद्या मूर्च्छामापुर्मृतेः समाम् ॥ ३ ॥
तत्र प्रविश्य निःशब्दो राजद्वारि स भूसुरः ।
राजाङ्गुल्यां योजयित्वा स्वाङ्गुलीयकसंचयम् ॥ ४ ॥
कवाटं ताडयेत्येवमुक्त्वा तूष्णीं बभूव ह ।
ततः स राजा त्वररं ताडयामास पाणिना ॥ ५ ॥
कवाटताडनेनैव तेषामुद्घाटने कृते ।
राज्ञो हृदि भयं जातं विस्मयश्च महानभूत् ॥ ६ ॥
एवं सर्वकवाटेषु क्रमादुद्घाटितेष्वथ ।
अन्तः प्रविश्य तत्रापि मोहचूर्णप्रयोगतः ॥ ७ ॥
आबालवृद्धं सुप्तेषु राजालयजनेष्वथ ।
राजतानि च पात्राणि हैमानि विविधानि च ॥ ८ ॥
अनर्घाणि च वासांसि पर्यङ्कास्तरणानि च ।
भक्ष्यभोज्यानि ताम्बूलचन्दनानि फलानि च ॥ ९ ॥
दधिक्षीरादिपेयानि खाद्यानि विविधानि च ।
पश्यन्क्रमेण भूपालसहितः पृथगास्थितम् ॥ १० ॥
कोशागारं ततो दृष्ट्वा तत्रस्थानप्यमोहयत् ।
कवाटोद्घाटनं कृत्वा पूर्ववत्प्रविवेश ह ॥ ११ ॥
तत्र नानाभाजनेषु नानाविधधनानि च ।
नवरत्नान्यनेकानि विलोक्याभरणानि च ॥ १२ ॥
तमसंतुष्टहृदयं मनसि ध्यानमास्थितम् ।
विप्रं स राजप्रवरः स्मितपूर्वमुवाच ह ॥ १३ ॥
आवां द्विजेन्द्र चौर्यार्थमेव खल्वधुनागतौ ।
यथेष्टं गृह्य गच्छावः सत्वरं चिन्तया किमु ॥ १४ ॥
इत्येवंवादिनं भूपं विलोक्याग्रे स भूसुरः ।
असंतुष्टो विनिःश्वस्य वचनं चेदमब्रवीत् ॥ १५ ॥
सखे मां त्वं विजानीहि धर्मचौर्यपरायणम् ।
अधर्मचौर्ये न क्वापि वर्तते मम मानसम् ॥ १६ ॥

राज्ञानेन तदीयपूर्विकनृपैः कृच्छ्रेण संपादिते
वित्तादौ क्रियमाणचौर्यकरणे दोषप्रसक्तेर्भयात् ।
चिन्ता मे समुपागता भवति चेदत्रस्थनिध्यादिषु
ग्राह्यांशः करवाणि चौर्यमधुना नो चेद्गमिष्याम्यहम् ॥ १७ ॥

निध्यञ्जनं तव करे स्थितं चेत्तेन वीक्ष्यताम् ।
निधिस्त्वया न स्थितं चेत्तव दास्येऽहमञ्जनम् ॥ १८ ॥
इति तस्य वचः श्रुत्वा स महीपालपुंगवः ।
सविनीतमिदं वाक्यं प्राह प्रहसिताननः ॥ १९ ॥

अदृश्यदृश्याञ्जनमेकमस्ति
मदीयहस्तेऽद्य महीसुरेड्य ।
न दिश्यते तेन निधिः कदाचि-
द्यतः पृथिव्यान्तरितः समन्तात् ॥ २० ॥

भूमेरूर्ध्वचरत्प्राणिचयादृश्यत्वसंभवे ।
तद्दृश्यत्वैकविषये समर्थं मामकाञ्जनम् ॥ २१ ॥

इति तस्य वचः श्रुत्वा स्वाञ्जनं प्रददावथ ।
उभावप्यञ्जनं धृत्वा दृग्वीक्ष्यैकाग्रमीयतुः ॥ २२ ॥
अथ भूमेरधोभागे भास्वरं भवनोत्तमम् ।
विलोक्य तद्द्वारि गतौ तावुभावतिवेगतः ॥ २३ ॥
तत्र द्वौ राक्षसौ दृष्ट्वा महामुसलपाणिनौ ।
भीते राज्ञि तमाश्वास्य विप्रो हुंकारमात्रतः ॥ २४ ॥
तौ दूरीकृत्य वेगेन यातुधानौ ततः परम् ।
अङ्गुलीस्पर्शमात्रेण कवाटोद्धाटने कृते ॥ २५ ॥
तत्रैका राक्षसी घोरा खड्गपाणिरदृश्यत ।
मुष्टिप्रहारेणैवाशु तां हत्वान्तः प्रविष्टवान् ॥ २६ ॥
तत्रोत्तुङ्गे चतुष्पीठे काञ्चने रत्नशोभिते ।
वितानतोरणोपेते चतुर्दीपविराजिते ॥ २७ ॥
महतीं पिठरीमेकां डोलायामधिरोपिताम् ।
राज्ञा साकं विलोक्याशु स्वाङ्गुल्या तामताडयत् ॥ २८ ॥
तावन्मात्रेण सा सम्यग्बभूवोद्धाटिता क्षणात् ।
विप्रेण भूभुजा चापि तदन्तर्वीक्षिते सति ॥ २९ ॥
तत्र शीर्षत्रयोपेतः कश्चित्कृष्णमहाफणी ।
मण्डलीकृत्य कुपितः फणास्फालनपूर्वकम् ॥ ३० ॥
भस्मप्रक्षेपणाच्छान्तकोपे तस्मिन्महीश्वरे ।
बहुदूरं गतवति पिठरीं तां व्यलोकयत् ॥ ३१ ॥
तत्रानर्घमणिप्रोतनानाभरणभासुरे ।
भाजनत्रितयं सूक्ष्मं दान्तमालोक्य विस्मितः ॥ ३२ ॥
करेणादाय चोद्धाट्य तदन्तर्वीक्षिते सति ।
तत्र तत्रैकमेकं तु रत्नमैक्षत्सपत्रकम् ॥ ३३ ॥
तानि रत्नानि चादाय तस्मिन्भूपे च पश्यति ।
स पठित्वा स्वयं पूर्वं त्रीणि पत्राणि तानि च ॥ ३४ ॥
तद्वाचककथां पश्चान्महासंतोषसंयुतः ।
राज्ञे निवेदयामास धर्मसंग्रहिसंज्ञकः ॥ ३५ ॥
सखे त्वं शृणु राजर्षेर्धर्मकेतोर्महात्मनः ।
प्रागासीन्मूलकूटस्थो वंशे कश्चिन्महीपतिः ॥ ३६ ॥
वीरबाहुरिति ख्यातो भुवि विख्यातकीर्तिमान् ।
यस्याश्वमेधैरसकृत्सर्वे देवाः सुतर्पिताः ॥ ३७ ॥
तस्याश्वमेधे दशमे जिष्णुपाशिधनाधिपैः ।
समर्पितानि रत्नानि त्रीण्येतानि सभान्तरे ॥ ३८ ॥
तत्रैन्द्रं क्षुत्पिपासादिहरमेतन्निरन्तरम् ।
वारुणं गुल्मकुष्ठादिसर्वरोगहरं त्विदम् ॥ ३९ ॥
कौबेरमिदमाख्यातं समस्तैश्वर्यदायकम् ।
इत्येतत्पत्रिकोद्भूतवाचकोदन्त ईरितः ॥ ४० ॥
यदत्र रत्नत्रितये क्षुत्तृडार्तिविमोचनम् ।
ऐन्द्रं तदिदमेकं मे तिष्ठत्विति समग्रहीत् ॥ ४१ ॥
शुक्रनक्षत्रसंकाशद्वात्रिंशन्मौक्तिकाञ्चितः ।
द्वात्रिंशत्कोटिनिष्कार्घो हारोऽयं तव तिष्ठतु ॥ ४२ ॥
अन्यत्सर्वमिदं तावदस्यैव वसुधापतेः ।
तिष्ठत्विति वदन्नेव तेन साकं बहिर्गतः ॥ ४३ ॥
कियद्दूरं ततो गत्वा राजा ब्राह्मणमब्रवीत् ।
चौर्यविद्यागुरुर्भूत्वा सम्यक्पालय मामिति ॥ ४४ ॥
तथास्त्विदानीं त्वं गच्छ प्रातरागच्छ मेऽन्तिकम् ।
ब्राह्मो मुहूर्तः संप्राप्तः स्नानार्थं गम्यते मया ॥ ४५ ॥

अत्युच्चाम्रद्रुमोपेतं यदग्रे दृश्यते गृहम् ।
तदिदं मम वेश्मेति जानीहि नितरां सखे ॥ ४६ ॥
इत्युक्त्वा स्वगृहं प्राप्य पत्न्यै वृत्तान्तमब्रवीत् ।
सापि श्रुत्वा महानन्दाद्भर्तारं परिषस्वजे ॥ ४७ ॥
अथ स्वालयमागत्य राज्ञि पर्यङ्कमीयुषि ।
द्वारपालादयः सर्वे प्रबुध्य भयविह्वलाः ॥ ४८ ॥
सर्वत्र विवृतद्वारं राजवेश्म निरीक्ष्य ते ।
कुड्यचित्राणीव तूष्णीं निश्चेष्टा अभवन्क्षणम् ॥ ४९ ॥
अथार्भाटध्वनिं श्रुत्वा सर्वत्र पुरपालकाः ।
राजाधिकारिणश्चापि सायुधाः समुपागमन् ॥ ५० ॥
कथं चोरः समायातः किं किं वा तेन चोरितम् ।
सर्वेषामीदृशी सुप्तिः क्वचिदप्यभवत्पुरा ॥ ५१ ॥
अनिवेदितमेतत्स्यात्क्षणार्धं नो महीपतिः ।
संक्रुद्धो घातयेत्सर्वान्दवाग्निर्विपिनं यथा ॥ ५२ ॥
इत्यन्योन्यं प्रजल्पन्तः कोपभीतिसमन्विताः ।
चोरागमनसंकेतभेरीं जघ्नुर्मुहुर्मुहुः ॥ ५३ ॥
भेर्यां तु हन्यमानायां चतुरङ्गबलैः सह ।
सेनापतिं पुरस्कृत्य मन्त्रिणश्च समागमन् ॥ ५४ ॥
एककालोत्पन्ननानाकर्णध्वनिसुपूरितम् ।
बभौ तदा राजगृहं वीचिशब्दैरिवार्णवः ॥ ५५ ॥
अरुणोदयवेलायां युगपत्कण्ठनिर्गतैः ।
जनकोलाहलैर्भेरीनिनादैर्वीरगर्जितैः ॥ ५६ ॥
संताडित इवोर्वीशः समुत्थाय जवाद्बहिः ।
निर्गत्य मुक्तादामादिशोभितायां समन्ततः ॥ ५७ ॥
सभायां हेमकॢप्तायां नवरत्नविनिर्मितम् ।
सिंहासनमुपाविश्य रेजे मध्यंदिनार्कवत् ॥ ५८ ॥
किमेतदिति पप्रच्छ स्वयमज्ञातवानिव ।
मन्त्रिणो वदनं वीक्ष्य सोऽपि कृच्छ्रादवोचत ॥ ५९ ॥
चोरागमनवृत्तान्तं कवाटोद्घाटनादिकम् ।
श्रुत्वा कोपाग्निना सर्वान्निर्दहन्निव चक्षुषा ॥ ६० ॥
ततो दीर्घं विनिःश्वस्य हस्ते हस्तं प्रवेश्य च ।
मेघगंभीरया वाचा प्राह मन्त्रिणमग्रतः ॥ ६१ ॥
सुमते दुर्मतिस्त्वं हि त्वां विश्वस्य स्थिते मयि ।
कथं त्वया नैव कृतं चोरनिग्रहणादिकम् ॥ ६२ ॥
मुहूर्तमात्राच्चोरोऽयं दण्डितो न भवेद्यदि ।
शीरस्तव पतेद्भूमौ पक्वतालफलादिवत् ॥ ६३ ॥
प्रविश्यान्तर्गृहं शीघ्रं तत्र किं किं न विद्यते ।
किं किमस्तीत्यादि सर्वं ज्ञात्वागच्छ ममान्तिकम् ॥ ६४ ॥
इत्याज्ञप्तः क्षितीशेन मन्त्री सुमतिसंज्ञकः ।
वेगादन्तःपुरं सर्वमेक एव परीक्ष्य च ॥ ६५ ॥
क्षोणीगृहमथाविश्य पिठर्यन्तर्निवेशितम् ।
भाजनत्रितयं दान्तं कुक्कुटाण्डप्रमाणकम् ॥ ६६ ॥
दृष्ट्वा करेण संगृह्य तदन्तर्वीक्षिते सति ।
द्वयोस्तदा त्वेकमेकं रत्नमेकत्र शून्यताम् ॥ ६७ ॥
अवलोक्यातिहृष्टः संस्तद्रत्नयुगलं स्वयम् ।
आदाय स्वकटीशाट्यां योजयन्नाययौ जवात् ॥ ६८ ॥
अथ राजानमासाद्य साञ्जलिः प्राह वञ्चकः ।
कोऽपि वास्यां महाराज पुर्यां चोरोऽस्ति कश्चन ॥ ६९ ॥

निगूढश्च महादुष्टो महासाहसिकाग्रणीः ।
अन्वेष्यदण्डनीयो हि नो चेद्राष्ट्रं विनाशयेत् ॥ ७० ॥
अन्तःपुरान्तर्गेहेषु श्रीभण्डारेषु वा प्रभो ।
तदन्यत्र च सर्वत्र न किंचिदपि चोरितम् ॥ ७१ ॥
किंतु भूमीगृहे तावत्पृथिव्यामस्ति भूपते ।
त्रितयं दान्तपात्राणां तत्र नान्यन्निरीक्षितम् ॥ ७२ ॥
उद्घाटिततयैवास्ते भाजनत्रयमद्य तत् ।
केनापि हेतुना नैव धारापि परिदृश्यते ॥ ७३ ॥
तत्र स्थितं वा यत्किंचित्पूर्वं न स्थितमेव वा ।
न जानेऽहं महाराज वैचित्र्यमिह दृश्यते ॥ ७४ ॥
इत्युक्तं मन्त्रिणा राजा श्रुत्वाशनिसमं वचः ।
अहो तस्करितं वेगात्केन तद्रत्नयुग्मकम् ॥ ७५ ॥
चोरान्तरस्यागमने नावकाशोऽत्र विद्यते ।
इति क्षणं विचार्याथ मन्त्रिणैवेति निश्चयम् ॥ ७६ ॥
कृत्वा साकं तेन पश्चात्स्वयमन्तःप्रविश्य च ।
अदृष्ट्वा त्रीणि रत्नानि चिन्तार्णोधौ निमग्नवान् ॥ ७७ ॥
चिन्ताग्निज्वालया तप्तसमस्तावयवस्ततः ।
क्रोधेन महताविष्टः सिंहासनमधिष्ठितः ॥ ७८ ॥
प्रेषयामास चतुरः किंकरान्वेत्रपाणिनः ।
धर्मसंग्रहिसंज्ञस्य विप्रस्यानयनेच्छया ॥ ७९ ॥
ते गत्वा तस्य सदनं क्रौर्यादेवं वचोऽब्रुवन् ।
दुर्बुद्धे त्वां महाराजो द्रष्टुमौत्कल्यवानिति ॥ ८० ॥
इति धार्ष्ट्यवचः श्रुत्वा ज्ञात्वा तत्समयोचितम् ।
तेनैव मणिना साकं राजालयमथाविशत् ॥ ८१ ॥
तत्र सिंहासनारूढं क्रुद्धं वैवस्वतोपमम् ।
विप्रो ददर्श राजानं मन्त्रिभिः परिवारितम् ॥ ८२ ॥
सोऽपि राजा विलोक्यैनं चक्षुषा प्रदहन्निव ।
मन्त्रिमध्ये महातेजा वचनं चेदमब्रवीत् ॥ ८३ ॥
कस्त्वं चोरवदाभासि किं किं वा चोरितं त्वया ।
सत्यं वदसि चेत्त्वां तु न वधिष्याम्यसंशयः ॥ ८४ ॥
इति तद्गिरमाकर्ण्य धैर्यमालम्ब्य यत्नतः ।
पितृपादाब्जयुगलं ध्यात्वेदं वाक्यमब्रवीत् ॥ ८५ ॥
नाहं प्राचीनचोरोऽस्मि महाराजशिखामणे ।
न चान्यत्र क्वचिदपि मया चौर्यमनुष्ठितम् ॥ ८६ ॥
किंतु पूर्वेद्युरेवार्धरात्रे तावकमन्दिरे ।
केनाप्येकेन चोरेण सह चौर्यं मया कृतम् ॥ ८७ ॥
किं वा तदिति चेद्वच्मि शृणु राजेन्द्रशेखर ।
भवत्कोशागारमध्ये भूम्यन्तरितवेश्मनि ॥ ८८ ॥
दिव्याञ्जनप्रयोगेण तत्र गत्वा निरीक्षिते ।
दान्तपात्रत्रये रत्नत्रितयं दृष्टवानहम् ॥ ८९ ॥
पत्रिकात्रितयं चासीत्तत्तत्पात्रान्तरस्थितम् ।
गम्भीरशब्दार्थयुतदिव्यवाचकपूरितम् ॥ ९० ॥
तत्पठित्वाशु तद्रत्नत्रयमाहात्म्यपूर्वकम् ।
मया ज्ञातो युष्मदीयमूलकूटस्थवैभवः ॥ ९१ ॥
मूलकूटस्थाश्वमेधे शक्राप्पतिधनाधिपैः ।
समर्पितस्य तद्रत्नत्रयस्य महिमादिकम् ॥ ९२ ॥
पत्रिकात्रयमेवाशु तत्ते व्यक्तीकरिष्यति ।
रत्नत्रितयमध्ये तु क्षुत्तृडार्तिविमोचकम् ॥ ९३ ॥
एकं रत्नं मयानीतं युगलं तत्र तिष्ठति ।
अथ तद्रत्नलाभेन भवानारोग्यसंपदौ ॥ ९४ ॥

लब्ध्वा मोदिष्यते चापि क्षुत्तृड्ढीनोऽस्मि चाप्यहम् ।
मदुक्तवाचके तावदेतस्मिन्नृपसत्तम ॥ ९५ ॥
असत्यलवलेशांशस्यास्पदो नैव विद्यते ।
इत्युक्त्वा सोऽभवत्तूष्णीं राजाप्याश्चर्यमाययौ ॥ ९६ ॥
तथापि रत्नापगमात्खिन्नो भूत्वा स भूपतिः ।
सनीतिकमिदं वाक्यमूचे वाक्यविशारदः ॥ ९७ ॥
पत्रिकात्रितयास्तित्वे त्वद्वाक्यं सत्यमेव हि ।
नो चेदसत्यमेवैतत्किंचानेनैव मन्त्रिणा ॥ ९८ ॥
मदाज्ञयाधुना तत्र गत्वाश्वत्रागतेन तु ।
पत्रिकात्रितयस्यापि रत्नानां त्रितयस्य च ॥ ९९ ॥
वार्त्तापि नोक्ता दान्तानां पात्राणां त्रितयादृते ।
मयापि वीक्षितं तत्र गत्वा रत्नद्वयं न हि ॥ १०० ॥
किमेतस्योत्तरं दातुं सम्यक् संचिन्तितं त्वया ।
यथार्थं वद नो चेत्त्वां ध्वंसयिष्याम्यसंशयः ॥ १०१ ॥
इति राज्ञो वचः श्रुत्वा महाधीरः स भूसुरः ।
सयुक्तिकं वचः प्राह निर्भयो मतिमत्तया ॥ १०२ ॥
मया च मन्त्रिभिः साकं पौरैरन्यजनैरपि ।
त्वयि राजेन्द्र कोशागारं समेत्य स्थिते सति ॥ १०३ ॥
पत्रिकात्रयवीक्षायाः परं तत्रैव भूमिप ।
रत्नद्वयस्य लाभोऽपि भवेदेव न संशयः ॥ १०४ ॥
येन केन प्रकारेणाप्यलब्धे रत्नयुग्मके ।
चोरदण्डेन मां राजन् सम्यग्दण्डितुमर्हसि ॥ १०५ ॥
यदीतरैरपहृतं स्याच्चेत्तद्रत्नयुग्मकम् ।
तानेव हत्वा दुर्वृत्तान्मां विमोचय भूपते ॥ १०६ ॥
इति तद्गिरमाकर्ण्य राजा संतोषसंयुतः ।
तथैवास्त्विति वाग्दानं कृत्वा तेन च मन्त्रिणा ॥ १०७ ॥
पौरादिभिश्च सहितः कोशागारं प्रविश्य च ।
पिठर्यन्तर्वीक्षिते तु पत्रिकात्रयमैक्षत ॥ १०८ ॥
पत्रिकापठनाद्राज्ञः सर्वेषामपि मन्त्रिणाम् ।
संतुष्टिरभवत्सम्यक् तस्मिन्विप्रे तथापि च ॥ १०९ ॥
रत्नद्वयस्यापगमात्खेदं चासीन्महत्तरम् ।
तदा मन्त्री तु सुमतिर्दीर्घं निःश्वस्य कोपतः ॥ ११० ॥
निश्वस्य. राज्ञो वदनमालोक्य सर्वेषामुपतिष्ठताम् ।
स्वचौर्याच्छादनार्थाय धाष्टर्यादेवं वचोऽब्रवीत् ॥ १११ ॥
महाजगद्वञ्चकोऽसौ ब्राह्मणो वधमर्हति ।
यतः स्वचौर्यं तेनैव सम्यगङ्गीकृतं प्रभो ॥ ११२ ॥
चोरवाक्यं न विश्वास्यं त्वया राजर्षिसत्तम ।
रत्नत्रयं चापहृत्य मिथ्यावादं करोत्यसौ ॥ ११३ ॥
एनं प्रबलचोरं त्वं न वधिष्यसि चेन्नृप ।
चोराणां विषयो भूयात्तवायं देश उत्तमः ॥ ११४ ॥
इत्युक्ते मन्त्रिवचने केषांचित्संमते सति ।
स विप्रो वचनं प्राह राजानं वीक्ष्य धार्मिकम् ॥ ११५ ॥
एकरत्नापहारेण सर्वरत्नहरोऽस्म्यहम् ।
मन्त्रिवाचा न संदेहो तद्वाक्येनैव हेतुना ॥ ११६ ॥
मां वधिष्यसि चेत्कामं तथैवास्तु न संशयः ।
किं च विज्ञापितव्यं मे किंचिदस्ति त्वदग्रतः ॥ ११७ ॥
शुद्धवद्भाषमाणस्य मन्त्रिणोऽस्य महीपते ।
सर्वाङ्गशोधनं कृत्वा ततो मां हन्तुमर्हसि ॥ ११८ ॥

यन्मया चोरितं रत्नं तदिदं पश्य भूमिप ।
इति राजकरे दत्त्वा पुनरप्याह तं नृपम् ॥ ११९ ॥
एतद्रत्नसमं रत्नद्वयं तद्यत्र दृश्यते ।
त्वया स वध्यो राजेन्द्र प्राणविश्वासवानपि ॥ १२० ॥
एकाकिना गतवता कोशागारं पुरैकदा ।
चोरितं व्यक्तमासीच्चेदनेनैव हि मन्त्रिणा ॥ १२१ ॥
अयं तु चोरवद्दण्ड्यो नो चेद्दण्ड्योऽहमेव हि ।
दैवादस्यैव वध्यत्वं भूयाच्चेत्तदनन्तरम् ॥ १२२ ॥
मन्त्रित्वघटकीभूता कस्मिन्वा तावकी कृपा ।
इति तद्यौक्तिकवचः श्रुत्वाथो धर्मिको नृपः ॥ १२३ ॥
किंकरांश्चतुरो वीक्ष्य दृप्तशार्दूलविक्रमान् ।
आज्ञापयदयं मन्त्री भवद्भिः शोध्यतामिति ॥ १२४ ॥
ते रौद्राकारकोपेन दुर्निरीक्ष्याक्षिवीक्षणाः ।
सर्वाङ्गशोधनं कर्तुं मन्त्रिणः प्रारभंस्तदा ॥ १२५ ॥

आपादमस्तकममुष्य समस्तमङ्गं
संशोध्य ते कटिपटान्तरलीयमानम् ।
निर्दोषरत्नयुगलं तदतिप्रकाश-
माहृत्य भूपतिकरे प्रददुः सभायाम् ॥ १२६ ॥

आलोक्य संसदि पुरार्पितरत्नतुल्यं
तद्रत्नयुग्ममवनीपतिरात्तहर्षः ।
आलिङ्ग्य विप्रमवदन्मम मन्त्रिवर्यः
साक्षात्त्वमेव तव रत्नमिदं तवैव ॥ १२७ ॥

अथ मन्त्रिणमाबद्ध्वा सर्ववीथीषु भूपतिः ।
चौर्यं प्रकटयामास वाद्यघोषेण भूयसा ॥ १२८ ॥
कारयित्वा चित्रवधं तस्य दुर्मन्त्रिणो नृपः ।
विप्रं तं मन्त्रिणं कृत्वा स्वास्थान्यां संन्यवेशयत् ॥ १२९ ॥

भेरीकाहलपूर्ववाद्यनिनदैर्भिन्दन्नभोमण्डलं
दिव्यान्दोलिकचामरादिविलसन्मूर्तिः स विप्रात्मजः ।
शूरैरायुधपाणिभिर्भटवरैः संवीतपार्श्वो महा-
वीथ्यां भूरिविभूषणो निजगृहं गन्तुं प्रतस्थे तदा ॥ १३० ॥

अग्रवर्णनिकरैरभिष्टुतः
स्वस्तिमङ्गलवचोभिरालयम् ।
प्राप्य नैजमथ पूर्वजादिका-
नभ्यवन्दत महाकुतूहली ॥ १३१ ॥

तत्क्षणे निजगृहं महोन्नतं
हेमरत्नरुचिरध्वजशोभम् ।
कारितं सपदि शिल्पिवरेण्यै-
रध्युवास स कलत्रसुताढ्यः ॥ १३२ ॥

प्राचेतसेन मणिना नृपतेस्तदानी-
मव्याधि गात्रमभवन्मदनप्रकाशम् ।
कौबेररत्नविभवेन च तस्य संप-
त्संपूर्तिरन्वहमहो सदने समिन्धे ॥ १३३ ॥

राज्यं मन्त्रिवशं कृत्वा राजा संपूर्णमानसः ।
अश्वमेधादिकान्यज्ञान्कृत्वा धर्मपरायणः ॥ १३४ ॥
अध्यात्मज्ञानसंसिद्धराजयोगैकनिष्ठया ।
अमनस्कपदानन्दमवाप्याभूत्सुनिर्वृतः ॥ १३५ ॥

क्षुद्बाधादिविहीनतामुपगतो मन्त्री सदाह्लादवान्
पुत्रादीनुपलभ्य सद्गुणवतः पत्न्यां कलाकर्षणात् ।
योगाद्भूपतिराज्यभारविषयव्यापारकालेष्वपि
स्वात्मारामतया स्थितोऽनुपमितप्रख्यातिरासीद्भुवि ॥ १३६ ॥

धर्मसंग्रहिचौर्यं तच्छ्रुत्वा चोरा भुवि स्थिताः ।
लज्जिता एव सुतरां तत्यजुश्चौर्यचिन्तनम् ॥ १३७ ॥
मनुमान्धातृपूर्वाणां राज्यभारो यथा पुरा ।
तथा बभौ राज्यभारो धर्मकेतोर्महीपतेः ॥ १३८ ॥
तौ हि मन्त्रिमहीपालौ चिरं स्थित्वा महीतले ।
पुत्रार्पितश्रियौ सन्तौ कैलासं प्रापतुः समम् ॥ १३९ ॥
इत्येवंविधवृत्तान्तधर्मचौर्यरसायनम् ।
रसिकानां नृणामस्तु मुदे मङ्गलदायकम् ॥ १४० ॥

इति श्रीधर्मचौर्यरसायनग्रन्थे तृतीयाश्वासः ।
शुभमस्तु । हरिः ॐ ।

श्रीसिंहलापुरीसुब्बरायकोविदसूनुना ।
धर्मराजेन लिखितं धर्मचौर्यरसायनम् ॥

ॐ । आहत्य श्लोकसंख्या २७५ — श्री

*Apparato critico a III.*

**2*d***: G. मुष्टिमदाद्विजः. **3*d***: G. मूर्छाम°. **4*a***: G. निश्शब्दे. **5*b***: G. तूष्णींबभूवहा; N. तुष्णीं बभूव ह; vedi *A.* 240. **11*a***: N. कोशागारे. **12*c***: N. नवरत्नाद्य°; G., *A.* 239 come nel testo. **13*cd***: G. राजप्रवरस्मितपूर्वमुवाचहा. **14*b***: N. खल्वधुना गतौ, vedi *A.* 240. **15*b***: G. भूसरः; **15*c***: G. विनिश्वस्य. **17*a***: N. कृछ्रेण; **17*c***: G. समुगता; **17*d***: N. नोचेद्ग°. **18*cd***: N. निध्यञ्जनं न स्थितं चेत्तव. **20*c***: N. न दृश्यते. **21*c***: G. तददृश्यत्वैकविषये (9 sillabe). **23*b***: G. तद्वारि. **24*b***: G., *A.* 240 °पाणिनौ; N.°पाणिना. **26*b***: G. °पाणिरदृश्यता; **26c**: difetto di cesura dopo *c*5. **27*d***: N. चतुर्द्वीप°. **30*a***: G. शीर्षतृयो°; **30*b***: G., N. (negli *errata*) कृष्णमहाफणी; *A.* 239 suggerisce कृष्णो महाफणी. **33*d***: N. सपात्रकम्. **35*d***: N. °संग्राहि°. **36*ab***: G. lezione sul MS dopo correzione autografa: श्रुणुराजर्षेर्द्धर्म्म° (con *śru* scritto *śṛu*); in origine ज corretto da जे e seguito a quanto pare da जू (cancellata); N. शृणु राजर्षे धर्म°; cfr. *A.* 240. **41*b***: G. क्षुतृडार्त्त°. **42*a***: G. °नेक्षत्र°; **42*b***: N. °काश्चितम्; vedi anche *A.* 239-40. **43*a***: G. अन्न्यत्. **44*b***: N. राजो corretto in राजा negli *errata*. **45*cd***: G. संप्राप्तस्नाना°. **46*a***: N. °द्रुतो°; vedi anche *A.* 240. **48*b***: N. रात्रिपर्यङ्कम्; vedi anche *A.* 240; **48*d***: G., N. प्रबुद्ध्य. **49*b***: la divisione segue un suggerimento di Aklujkar; N. निरीक्ष्यते; G. non distingue; **49*c***: difetto di cesura dopo *c*4. **51*cd***: G. सुप्तिक्क°. **52*b***: G., N. come nel testo; *A.* 240 suggerisce क्षणार्द्धेन; vedi traduzione e nota. **57*d***: N. समंततः. **58*a***: G. °क्लिप्तायां; **58*c***: G. सिह्मा°; **58*d***: G., N. मध्यन्दिना°. **59*d***: N. कृछ्राद°.**60**: G. nella numerazione: ५ corretto in ६. **61*a***: G. विनिश्वस्य; **61*b***: प्रवेश्य *ex conj. A.* 240; G., N. प्रविश्य. **64*cd***: N. किमस्तीत्यादिसर्वं ज्ञात्वा गच्छ; vedi anche *A.* 240. **66*c***: G. °तृतय°. **67*d***: N. शून्यता, corretto in शून्यताम् negli *errata*. **70*c***: *ex conj.*; G. अन्विष्यदेण्डनियो; N. अन्विष्य दण्डनीयो; **70*d***: N. नोचेद्राष्ट्रं. **75*d***: N. तद्रत्न°. **77*d***: G. चिन्तार्ण्णोधौ; N. चिन्ताम्भोधौ. **78*d***: G. सिह्मासन°. **80*d***: N. द्रष्टुमौत्सुक्यवानिति. **81*a***: *ex conj. A.* 240; G., N. धार्ष्ट्यं. **84*b***: G. किंकिवा; **84*d***: N. वधिष्याम्यसंशयम्. **88*b***: G. श्रुणु (con *śru* scritto *śṛu*). **91*c***: G. युष्ट्मदीय्य° [*sic*]. **93*d***: G. क्षुत्रडार्त्ति°. **94*a***: G. रेत्नम्मया°;

**94*d***: G. संपदं corretto in संपदौ. **99*b***: N. गत्वा श्वत्र°, corretto negli *errata* in गत्वाश्वत्र. **100*a***: N. वार्तापि. **101*d***: N. °संशयम्. **103*c***: N. राजेन्द्रकोश°; **103*cd***: G. कोशागारमेत्य con *ṁ sa* aggiunte sopra la riga dopo *ra*. **108*d***: G. पत्रिकातृय°. **109*c***: G. सम्म्यक्. **110*d***: *ex conj. A.* 240; G., N. **111*c***: G. ब्व° (per स्व°). **112*c***: तेनैव *ex conj. A.* 244; vedi anche 257 n. 20 e la nota alla traduzione italiana; G. riporta यतस्वचौर्यंसेनैव, N. स्वचौर्यं स्वेनैव. **114*b***: G. वधिस्यसि. **116*b***: G. °हरोस्महं. **118*d***: *ex conj. A.* 240; G., N. हन्तुमर्हति. **119*c***: *ex conj.*; G., N. दत्वा. **121*a***: G., all'inizio del verso: क vocalizzata, a quanto pare, sia con *e* sia con *i*, quindi cancellata. **122*b***: N. नो चोद्द°; **122*c***: G. वद्ध्यत्वभू°. **123*cd***: G. वचश्श्रुत्वा. **128*a***: N. मन्त्रिणमाबध्य; **128*b***: G. °वीधीषु. **129*d***: G. स्वास्थान्यांसन्निवेशयत्. **130*a***: N. भेरी क°. **132*d***: N. सकलत्र° corretto negli *errata* in स कलत्र. **133*b***: N. °मव्याधिगा°; vedi *A.* 240. **135*d***: G. सुनिर्वृितः. **136*a***: G. °बादा° corretto in °बाधा°. **Col**.: G. ग्रन्धेत्रितीयाश्वासः; N. °रसायने (omette ग्रन्थे). Strofe di chiusura: G. सिह्मला° (per सिंहला°). Alla fine G. ha आहत्यश्ले[*sic*]कसंख्याः २७५, mentre N. non riporta le formule beneaugurali e termina con आहत्य श्लोकसंख्या २७६ (per la discrepanza vedi nota alla traduzione). Il ५ di G. २७५ è reso in forma ornamentale e termina con una lunga riga orizzontale fino a श्री, scritto senza *visarga* finale.